International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(1): 52-53
© 2019 IJSR
www.anantaajournal.com
Received: 18-11-2018
Accepted: 21-12-2018

डॉ0 उपेन्द्र साहु
एकहरि, लदनियाँ, मधुबनी, बिहार, भारत

Corresponding Author:
डॉ0 उपेन्द्र साहु
एकहरि, लदनियाँ, मधुबनी, बिहार, भारत

# भर्तृहरेः श्रृङ्गारशतक– विमर्शः

**डॉ0 उपेन्द्र साहु**

**प्रस्तावना**

श्रृङ्गारशतकं हि भर्तृहरेः कृतित्वेन प्रसिद्धं प्रस्तुतिकाव्यम्। अनिह्नितैतिह्येष्वयमप्येकः कविः। बहवो हि ग्रन्था भर्तृहरिप्रणीतत्वेन गृहीता सन्ति। वाक्यपदीयं, वाक्यपदीयस्य ब्रह्मकाण्डस्य टीका, पातञ्जलमहाभाष्यस्य व्याख्या, अष्टाध्याय्या भागवृत्तिः, रावणवधकाव्यं, नीतिशतकं, श्रृङ्गारशतकं वैराग्यशतकमन्यान्यग्रन्थाञ्च भर्तृहरिप्रणीता इत्युच्यन्ते। तेषु हि वाक्यपदीयं तु प्रसिद्धमेव तत्कृतित्वेन एवमेव तस्य टीका च। तेन हि महाभाष्यस्य व्याख्या दीपिकाख्याऽऽसीदिति कैयटस्य 'तथापि हरिबद्धेन सारेण ग्रन्थसेतुना' इति प्रदीपवचनाज्ज्ञायते। तस्याः पूर्वतनो भागस्तु प्रकाशितोऽपि वर्तते। अष्टाध्याय्या वृत्तिरपि भागवृत्तिसङ्कलननाम्ना प्रकाशिता दृश्यते। रावणवधकाव्यस्य प्रणेता भट्टिः भर्तृहरिरेव नान्य इति 'इति भर्तृकाव्यटीकायां जयमङ्गलायाम्' इति मुग्धबोधिनीकारवचनात्, 'महान्तः कवयः सन्तु महान्तः पण्डितास्तथा। महाकविर्महाविद्वानेको भर्तृहरिर्मतः'। इति परम्परा– श्लोकात् चानुमीयते। शतकत्रयी तु तत्कृतित्वेन सर्वत्र सुभाषिता– वल्यादिषु गृहीतैव। अथ कोऽसावित्यपेक्षायां केचित्तं विक्रमादित्यस्य भ्रातरं मन्यन्ते। यथोक्तं –

> ब्राह्मण्यामभवद्वराहमिहिरो ज्योतिर्विदामग्रणी
> राजा भर्तृहरि विक्रमनृपः क्षत्रात्मजायामभूत्।
> वैश्यायां हरिचन्द्रवैद्यतिलकौ जातश्च शङ्कुः कृति
> शूद्रायामपरः षडेव शवरस्वामिद्विजस्यात्मजाः।। [1]

कथानकान्तरानुसारेण चन्द्रगुप्ताख्यब्राह्मणस्य चतस्रो भार्या आसन्। तासु हि ब्राह्मण्यां वररुचिः, क्षत्रियायां विक्रमार्कः, वैश्यायां भट्टिः, शूद्रायां भर्तृहरिश्च सञ्जाता इति। एवमेव 'श्रीमद्गोविन्द–दीक्षितसूनुविक्रमावरजभट्टि– महाकविविरचिते महाकाव्ये' इत्येकत्र 'वलभीवास्तव्यस्य श्रीस्वामिसूनोर्भट्टिमहाब्राह्मणस्य महावैयाकरणस्य कृतौ' इत्यप्यन्यत्र लिखितमपि दृश्यते। केचिदमुं काश्मीरं मन्यन्ते, परे उज्जयिनीवासिनं, अन्ये तु वलभीवासिनमपि कथयन्ति। विन्ध्याचलपार्श्वे चुनारप्रदेशे भर्तृहरेर्दुर्गत्वेन प्रसिद्धमेकं जीर्णदुर्गमपि नयनपथमायाति। तद्धि भागीरथ्या दक्षिणतटे विद्यते। तेन हि भर्तृहरेः परिचयः सम्प्रत्यपि चित्रविचित्रकथाविहारभूमिरेव। केचित्कथयन्ति ह्यसौ ब्राह्मण आसीदपरे तं क्षत्रियं कस्यापि देशस्य शासकमपि मन्यन्ते। केचित्तं शूद्राजातमपि। भर्तृहरिप्रणीत्वेन ख्यातानां ग्रन्थानां प्रणेता किमेक एव उताहो एकाधिका भर्तृहरय आसन्नित्यपि पक्षो निर्णेतव्य एव। न किमपि ज्ञायतेऽस्य विषये। केचिदिमं नृपविक्रमार्कस्य भ्रातरं मन्यन्ते विक्रमादित्यपूर्वकालभवम्। परे तु इयं वैक्रमसप्तम–शतकभवमपि मन्यन्ते। केचिदिमं बौद्धं मन्यन्ते, केचित्तु शैवमपि। इत्सिङ्गकथनानुसारेण कर्तृहरिनामा कश्चिद्वैयाकरणः 651 (708 वै0) पञ्चत्वं गत इति ज्ञायते। केचित्तु तं भामहपूर्ववर्तिनमपि मन्यन्ते। [2]
यद्यपि विषयोऽत्र नैव निर्णेतुं शक्यः स्पष्टप्रमाणाभावात्तथपि वयमित्थं विचिन्तयामः –
महाभाष्यव्याख्याता भर्तृहरिर्विक्रमभ्राता भर्तृहरिः पतञ्जलिशिष्यो वा तच्छिष्यशिष्यः। वाक्यपदीयस्य प्रणेता तस्य ब्रह्मकाण्डस्य व्याख्याता भर्तृहरिर्विक्रमानन्तरतृतीयशतकभवो वसुरातशिष्यः। भागवृत्तिकृद्भर्तृहरि–क्रमानन्तर 700 मितवर्षमभितः स्थितिमान्। भट्टिकाव्यस्य प्रणेताऽपर एव भट्टिनामा न तु भर्तृहरिः। शतकत्रय्याः प्रणेता पूर्वोक्तेभ्यो विलक्षणः सम्भवतः 632.707 मितवैक्रमाब्दान्तरालवर्ती। [3]
शतकत्रय्यां श्रृङ्गारशतकमाद्यं हि शतकम्। अत्र हि रतिर्मानव– जीवनस्योपादानविशेषत्वेन वर्णिता। शतकेऽस्मिन् सन्ति एकाधिक– शतपद्यानि। कवेः शैली प्रसादमाध्युर्यप्रोता। अस्य हि प्रत्येकं पद्यं स्वस्मिन्नेव पूर्णम्। अत्र हि भाषाभावयोर्मञ्जुलः समन्वयः। अत्र कवित्वं पाण्डित्यञ्च एकीभूय स्थिते दृश्येते। यथा हि –

सैवामृतलता रक्ता विरक्ता विषबल्लरी।। [5]
स्मितेन भावेन च ल=या भिया पराङ्मुखैरर्धकटाक्षवीक्षणैः।
वचोभिरीर्ष्याकलहेन लीलया समस्तभावेः खलु बन्धनं स्त्रियः।। [4]
अद्यापि तां प्रणयिनीं कृगशावकाक्षीं
पीयूषवर्णकुचकुम्भयुगं वहन्तीम्।
पश्याम्यहं यदि पुनर्दिवसावसाने
स्वार्गापवर्गवरराज्सुखं त्यजामि।।
काव्यस्यास्य मर्मस्पर्शिता पाषाणमपि द्रवयति।

गीतगोविन्दं हि जयदेवस्य कृतिः। जयदेवो हि वङ्गनरेशस्य लक्ष्मणसेनस्य सभापण्डित आसीत्। तस्य च स्थितिकालः 1226 मितवैक्रमाब्दमभितः। तेन जयदेवोऽपि 1200–1280 मितवैक्रमाब्दान–भितः स्थितिमान्। उत्कलस्य बिन्दुबिल्वग्रामे तस्य जन्म कथ्यते। अद्यापि तत्र तत्पुण्यस्मृतौ प्रतिवर्ष समारोह आयुज्यते गीयन्ते च गीतगोविन्दपद्यानि।

गीतगोविन्दं 12 सर्गेषु विभक्तं गीतिकाव्यम्। अत्र हि नायक–स्याचरणानुसारेणाध्यायनाम अक्लेशकेशवः, मुग्धमधुसूदनः इत्यादिः। अत्र राधकृष्णयोः प्राञ्जलं प्रेम वर्णितमस्ति। इदमष्टपदीसंज्ञयाऽपि ज्ञायते। अत्र सङ्गीतगानवर्णनभाषणानां सुन्दर–समन्वयो दृश्यते। कथ्यते हि कृष्णो ब्रह्म राधिका तु जीवात्मा। तेन ह्यत्र ब्रह्मजीवात्मनो नायकनायिकासम्बन्धोऽत्र कल्पितः। शृङ्गारात्मक–गीतिकाव्येष्विदं नृपायते।

ग्रन्थस्यास्य सन्ति बह्व्ष्टीकाः। कथ्यते हि यदि अननूद्यता खलु उत्कृष्टकाव्यस्य लक्षणं तर्हि तद्गीतगोविन्दमेव। निभाल्यतामस्य भावगाम्भीर्यं भाषामञ्जुलतां च। यथा हि –

**संदर्भाः–**


1. संस्कृतसाहित्येतिहासः, पृष्ठम्– 76।
2. तत्रैव – 69।
3. तत्रैव।
4. संस्कृतसाहित्येतिहासः, पृष्ठम्– 39।
5. तत्रैव।